# shrIlakShmIhayavadanaratnamAlAstotram

# શ્રીલક્ષ્મીહયવદનરત્નમાલાસ્તોત્રમ્

## Document Information

Text title : lakShmIhayavadanaratnamAlAstotram

File name : lakShmIhayavadanaratnamAlAstotram.itx

Category : vishhnu, vishnu, lakShmI, pancharatna, devii, mAlAmantra, devI

Location : doc_vishhnu

Author : Abhinava RanganAthabrahmatantraparakAlamahAdeshika

Transliterated by : Rujuta rujuta5879 at gmail.com

Proofread by : Rujuta rujuta5879 at gmail.com

Latest update : April 2, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીલક્ષ્મીહયવદનરત્નમાલાસ્તોત્રમ્

॥ શ્રીઃ ॥

શ્રીલક્ષ્મીહયવદનપરબ્રહ્મણે નમઃ ।
શ્રીમતે શ્રીકૃષ્ણબ્રહ્મતન્ત્રપરકાલયતીન્દ્રમહાદેશિકાય નમઃ ।
શ્રીમન્મહાભારતે શાન્તિપર્વણિ મોક્ષધર્મે નારાયણાખ્યાને હયશિર
ઉપાખ્યાનસ્ય વ્યાખ્યાને હયશિરોરત્નભૂષણે તદ્વિવરણદીધિતૌ ચ
પરિશીલિતાનાં શ્રુતીનામર્થસ્ય સઙ્ગ્રાહક
શ્રીલક્ષ્મીહયવદનરત્નમાલાસ્તોત્રમ્ ।

વાગીશાખ્યા શ્રુતિસ્મૃત્યુદિતશુભતનોવસુદેવસ્ય મૂર્તિઃ
જ્ઞાતા યદ્વાગુપજ્ઞં ભુવિ મનુજવેરૈર્વાજિવક્ત્રપ્રસાદાત્ ।
પ્રખ્યાતાશ્ચર્યશક્તિઃ કવિકથકહરિઃ સર્વતન્ત્રસ્વતન્ત્રઃ
ત્રય્યન્તાચાર્યનામા મમ હૃદિ સતતં દેશિકેન્દ્રઃ સ ઇન્ધામ્ ॥ ૧॥

સત્વસ્થં નાભિપદ્મે વિધિમથ દિતિજં રાજસં તામસં ચા-
બ્બિન્દ્વોરુત્પાદ્ય તાભ્યામપહૃતમખિલં વેદમાદાય ધાત્રે ।
દત્ત્વા દ્રાક્તૌ ચ હત્વા વરગણમદિશદ્વેધસે સત્ર આદૌ
તન્ત્રં ચોપાદિશદ્યસ્સ મમ હયશિરા માનસે સન્નિધત્તામ્ ॥ ૨॥

અધ્યાસ્તેઽઙ્કં પરાવાગ્ વરહયશિરસો ભર્તુરાચાર્યકે યા
વાગ્છાવાનૈતરેયોપનિષદિ ચરમાત્પ્રાક્તને ખણ્ડ આદૌ ।
યસ્યા વીણાં ચ દૈવીં મનસિ વિનિદધત્ખ્યાતિમેત્યન્ત્યમન્ત્રે
સેશાના સર્વવાચો મમ હૃદયગતા ચારુ માં વાદયેદ્વાક્ ॥ ૩॥

કૃષ્ણં વિપ્રા યમેકં વિદુરપિ બહુધા વેદયો (રૈતરેયે) રાદિમાન્તે
સ્રષ્ટા વિસ્રંસમાનસ્સ્વમથ સમદધાચ્છન્દસાં યેન દાનાત્ ।
કૃષ્ણ વિષ્ણું ચ જિષ્ણું કલયિતુરપિ યત્સંહિતામાયુરુક્તં
વાક્શ્લિષ્ટં પ્રાણમેનં હયમુખમનુસન્દધ્મહે કિં વૃથાઽન્યૈઃ ॥ ૪॥

પ્રખ્યાતા યાઽઽશ્વલાયન્યધિકફલદશશ્લોક્યભિખ્યા તદન્તઃ
શ્રુત્યુક્તા વાક્ સરસ્વત્યપિ હયમુખ તે શક્તિરન્યા ન યુક્તા ।
પૂર્ણા ત્વચ્છક્તિરર્ધં ભવતિ વિધિવધૂર્યા નદી સા કલાસ્યા
ઇત્યુક્તે બ્રહ્મવૈવર્ત ઇહ સમુદિતા સ્યાત્પરા નિમ્નગાઽન્યા ॥ ૫॥

શ્રીહર્ષો વિષ્ણુપત્નીં વદતિ કવિરિમા નૈષધે મલ્લિનાથઃ
ખ્યાતામેતાં પુરાણે હયમુખ ભુવિ ચ સ્થાપિતાં વિષ્ણુપાર્શ્વે ।
ધીવાગ્મિત્વાર્થજપ્યં દિનમુખસમયે શૌનકસ્સૂક્તમત્યાઃ
શ્રીયુક્તં બહ્વૃચસ્સ સ્મૃતિકૃદપિ તદા ચિન્તનીયં તથૈનામ્ ॥ ૬॥

વાગામ્ભૃણ્યાદિસૂક્તે નિરવધિમહિમા યા શ્રુતા વાક્ ચ દેવી
પૂર્વે સૂક્તેઽપિ હંસસ્ત્વમધિકમહિમા વિશ્રુતો બહ્વૃચૈર્યઃ ।
યુક્તાવારણ્યકે તૌ કથિતબહુગુણૌ સામની સંહિતેત્ય-
પ્યારાધ્યો વ્યૂહરૂપી હયમુખવિદિતો જ્ઞાનિનાં કર્મભિસ્ત્વમ્ ॥ ૭॥

ઇન્દ્રો વૃત્રં હનિષ્યન્ સખિવર વિતરં વિક્રમસ્વેતિ વિષ્ણું
સમ્પ્રાર્થ્યાતો હતારિસ્તત ઉપજનિતબ્રહ્મહત્ત્યાપનુત્ત્યૈ ।
સૂક્તાભ્યામાહુતિં યં પ્રતિ પરમજુહોન્મૂર્ધ્નિ ગન્ધર્વ એકો
દેવાનાં નામધારી સ મમ દૃઢમતાવદ્ય વાચસ્પતિસ્તાત્ ॥ ૮॥

વેદે ચાથર્વણાખ્યે પ્રથમત ઉદિતં યત્રિષપ્તીયસૂક્તં
તન્મેધાજન્મકર્માઙ્ગમિતિ નિગદિતં કૌશિકેન સ્વસૂત્રે ।
મેધાકામઃ પુમાન્ યસ્તુરગમુખ તતસ્સર્વલોકાધિનાથં
ધ્યાયેદ્વાચસ્પતિં ત્વાં પ્રભવતિ સકલસ્તચ્છ્રુતાર્થોઽપ્રકમ્પ્યઃ ॥ ૯॥

નાસન્નો સત્તદાનીમપિ તુ કમલયાઽવાતમેકં તદાનીત્
તસ્માદ્ધાન્યત્પરં કિઞ્ચિદપિ ન તમસા ગૂઢમગ્રે પ્રકેતમ્ ।
અદ્ધા કો વેદ હેતું દ્વિવિધમવિગુણં વાસુદેવાભિધાનં
વ્યૂહં ત્વાં પ્રાતરર્ચ્યં હયમુખ ભગમાહુઃ ક્રમાત્તૈત્તિરીયાઃ ॥ ૧૦॥

પ્રાતઃપૂજ્યં ભગાખ્યં પ્રથમમકથયન્ બહ્વૃચાઃ પઞ્ચમેઽથો
નાસત્સૂક્તેઽષ્ટમે પ્રાગ્વદપિ સમવદન્ તૈતિરીયક્રમાત્ત્વામ્ ।
પારાશર્યોઽવતીર્ણં વદતિ હયમુખાથર્વણઃ કૌશિકસ્ત્વામ્
મેધાર્થં પ્રાતરર્ચ્યં ભગમનુમનુતે સંહિતાઽપ્યાહ સાધુ ॥ ૧૧॥

પ્રદ્યુમ્નાન્તં ત્રિપાદ્ભાસ્વરવપુરમૃતં વાસુદેવાદિવૃન્દે
પાદસ્તત્રાનિરુદ્ધો ભુવિ તત ઉદભૂદાત્મભૂરૃગ્વિધિજ્ઞાઃ ।

હુત્વા ત્વાં યજ્ઞરૂપં હયવદન જિતન્તે સ્તુતિં તન્વતેઽતઃ
નિર્ણીતં સર્વવેદેષ્વનુપમમિતિ તત્પૌરુષ સૂક્તમાપ્તૈઃ ॥ ૧૨॥

સર્વે વેદાઃ પ્રજાશ્ચ પ્રચુરબહુભિદાઃ સંશ્રયન્તે યમેકમ્ ।
શાસ્તા યોઽન્તઃપ્રવિષ્ટસ્સ્વયમપિ દશધાત્માચરત્યર્ણવે યમ્ ।
બ્રહ્મા ચૈકોન્વવિન્દદ્ધરિમિહ દશહોતારમન્તશ્ચ ચન્દ્રે
દેવાસ્સન્તં સહૈનં ન હિ વિદુરવતાત્સોઽદ્ય વાચસ્પતિર્મામ્ ॥ ૧૩॥

યસ્માદ્બ્રહ્મા ચ રુદ્રસ્સકલજગદિદં જાયતેઽન્તર્બહિર્યત્
વ્યાપ્ય સત્તાં ચ યસ્મિન્ લયમપિ લભતે યશ્ચતુર્વેદમૂર્તિઃ ।
વિષ્ણુર્નારાયણોઽષ્ટાક્ષરપદવિદિતો દેવકીપુત્ર એકો
યોથાર્વાઙ્ગે મધોઃ સૂદન ઉપનિષદિ જ્ઞાયતે મે સ ઇન્ધામ્ ॥ ૧૪॥

શક્તિઃ સ્વાભાવિકી સાત્ર ચ વિવિધપરા શ્રૂયતે જ્ઞાનમેવં
ત્રેધા તત્ર ક્રિયેત્થં બલમપિ તદસૌ વાસુદેવઃ સ હંસઃ ।
યો બ્રહ્માણં વિધાય પ્રથમમથ પરાન્ પ્રાહિણોત્સર્વવેદાન્
તસ્મૈ દેવં પ્રપદ્યે શરણમહમિમં ચામૃતસ્યૈષ સેતુઃ ॥ ૧૫॥

વમ્ર્યો વિષ્ણોર્ધનુર્જ્યાં હયવદન વરાન્નેચ્છયા ચિચ્છિદુસ્તત્ ।
કોટ્યા ચ્છિન્નં ચ વિષ્ણોઃ શિર ઇતિ ગદિતં યત્પ્રવર્ગ્યાર્થવાદે ।
તચ્છીર્ષં યાજમાનં શ્રુતિમુખત ઇદં સ્થાપિત યુક્તિતોઽપિ
પ્રાદુર્ભાવઃ સ ગૌણો બહુમુખહરિવંશાદિનિર્ધારિતો વા ॥ ૧૬॥

શુક્લં વેદં વિવસ્વાનુપદિશસિ પરં યાજ્ઞવલ્ક્યાય વાજી
વેદૈકાર્થૈર્વચોભિર્મિતમિદમખિલામ્નાયધીકારિણીં યામ્ ।
વાગ્દેવીં મોક્ષધર્મે કથયતિ મુનિરાટ્ તત્કૃપાલબ્ધભૂમા
ત્વચ્છક્તિસ્સેત્યકમ્પ્યં હયમુખ ગદિતં બ્રહ્મવૈવર્તવાગ્ભિઃ ॥ ૧૭॥

તસ્માદ્વેદેઽપિ તત્રોપનિષદિ બૃહદારણ્યકે કાણ્ડ આત્મા
ત્વં વાગ્દેવ્યા સહાદૌ જનયસિ મિથુનીભૂય સર્વાંશ્ચ વેદાન્ ।
ધાતારં તસ્ય પત્નીં તદનુ તદુભયદ્વારિકાં વ્યષ્ટિસૃષ્ટિં
તદ્યજ્ઞારાધિતોઽસ્મૈ હયવદન વરાન્યચ્છસીતિ પ્રતીમઃ ॥ ૧૮॥

તુર્યેઽધ્યાયે દ્વિતીયં તુરગમુખ શિશુબ્રાહ્મણ વ્યૂહરૂપમ્
પ્રાણ સ્થૂણાં શિશું ત્વાં ચમસમપિ શિરોઽર્વાગ્બિલં ચોર્ધ્વબુધ્નમ્ ।
સપ્તાનાં દેવતાનામધિકરણમભિત્રેન્દ્રિયાણાં જયાર્થં
વાચાષ્ટમ્યા યુતં ત્વાં પરિકલયતિ તદ્બ્રહ્મ ભક્તાર્તિહારિ ॥ ૧૯॥

દધ્યઙ્ઙાથર્વણોશ્વિત્રિદશકૃતશિરોધારણાદશ્વમૂર્ધ્ના
તાભ્યાં પ્રાવર્ગ્યતત્ત્વં હયમુખ સમુપાદિક્ષદેતદ્યથાર્થમ્ ।
એતાવત્યેવ તત્ત્વે કલિબલવશતસ્તામસાશ્શક્ત્યધીનં
ભાવત્કં શીર્ષમાહુર્ભુવિ જનિસમયે ત્વત્કટાક્ષાતિદૂરાઃ ॥ ૨૦॥

દધ્યઙ્ઙાથર્વણો યો હયમુખ બૃહદારણ્યકે કાણ્ડ આદૌ
આહ પ્રાવર્ગ્યતત્ત્વં યદપિ શતપથે દીક્ષણીયાર્થવાદે ।
વિષ્ણ્વાખ્યં તત્ત્વમુક્તં પુનરુપનિષદિ બ્રહ્મ વાગીશરૂપં
યચ્ચ પ્રોક્તં તૃતીયે તદપિ ચ સ મધુબ્રાહ્મણે વક્તિ તુર્યે ॥ ૨૧॥

વાચા દેવ્યાનિરુદ્ધેન ચ સૃજતિ જગત્સર્વમિત્યત્ર ઉક્તો
વાહાસ્યો વાસુદેવઃ સ પર ઇતિ મધુબ્રાહ્મણં સ્થાપયિત્વા ।
દધ્યઙ્ઙાથર્વણોશ્વિત્રિદશહિતમધુત્વાષ્ટ્રકક્ષ્યોપદેષ્ટા
તત્ત્વં જાનાતિ ચેત્યપ્યખિલશુભતનું વક્તિ વાગીશ્વરં ત્વામ્ ॥ ૨૨॥

દધ્યઙ્ઙાથર્વણોઽસાવુપદિશતિ મધુબ્રાહ્મણં ત્વાષ્ટ્રકક્ષ્યં
યત્તન્નારાયણાખ્યં કવચમિતિ સમાધુષ્યતે સાત્વિકાગ્ર્યૈઃ ।
વૃત્રસ્યેદં વધાયાલમિતિ હયમુખ બ્રહ્મવિદ્યેતિ તત્ત્વં
વાગીશૈતે ન જાનન્ત્યનઘ તવ કૃપાબાહ્યતાં યે પ્રયાતાઃ ॥ ૨૩॥

તત્ત્વં નારાયણાખ્યોપનિષદિ કથિતં પઞ્ચરાત્રોક્તરીત્યા
તન્નામાખ્યાન આહાશ્વમુખ વિશદમાદ્યં ચ ધર્મં મુનીન્દ્રઃ ।
ગીતાયાં સઙ્ગૃહીતં વિશદયિતુમનાઃ કૃષ્ણ વાહાનનૈક્યં
બ્રૂતે વેદોદિતત્વં સ્થિરયતિ ચ તદત્રોક્ત એકાન્તિધર્મે ॥ ૨૪॥

આદૌ નારાયણં તં વદતિ મધુજિતં દેવકીપુત્રમન્તે
વેદાન્તો મોક્ષધર્મે વરહયશિરસં પ્રાહ કૃષ્ણસ્સ્વમેવ ।
ઇત્યાલોચ્યૈવ યોગી કલિજિદભિજગૌ તત્ક્રમાત્ સ્તૌતિ મધ્યે
વાહાસ્ય ત્વાં શઠારિર્મુનિરપિ મનુતેઽશ્વં પુરઃ કૃષ્ણમન્તે ॥ ૨૫॥

જન્માદીનાં નિદાનં કતિચિદકથયન્ દેવમેકં તથાઽન્યે
દેવીમેકાં વિદુસ્તન્મિથુનમવિકલં બ્રહ્મ વેદાન્તવેદ્યમ્ ।
ઇત્યેવં સ્થાપયિત્વા ચિદચિદવિયુતં શ્રીમદેકં તદિત્ય-
પ્યાચખ્યૌ મોક્ષધર્મે હયમુખજનિવૃત્તાપદેશાન્મુનીન્દ્રઃ ॥ ૨૬॥

શ્રાવણ્યાં તેઽવતારે હયમુખ નિગમોદ્ધારણાર્થત્વબુદ્ધેઃ

ઋગ્વેદોપક્રમસ્તચ્છ્રવણભ ઇતિ નિશ્ચિન્વતે બહ્વૃચાગ્ર્યાઃ ।
પ્રારમ્ભો પૌર્ણમાસ્યાં યજુષ ઇતિ પરે યાજુષાઃ સઙ્ગિરન્તે
તદ્વેદોપક્રમાન્તે ભુવિ વિધિવશગાસ્ત્વાં સમારાધયન્તિ ॥ ૨૭॥

વિષ્ણોઃ પત્ની પરા વાગિતિ બહુમનુતે ભારતી યાં યદીંશઃ
પત્યુઃ પ્રાક્પઞ્ચરાત્રં શ્રુતિમપિ સમુપાદિક્ષદિત્યાદરેણ ।
તદ્વાગાશ્લિષ્ટમૂર્તિં હયશિરસ ઉપારાધયન્તી નિશમ્ય
શ્રીભાષ્યં લક્ષ્મણાય સ્વપતિવિદિત યત્યાકૃતિં બિભ્રતેઽદાત્ ॥ ૨૮॥

વાગીશાનસ્ય મન્ત્રં શ્રુતિશિખરગુરુસ્તાર્ક્ષ્યલક્ષં જપિત્વા
પ્રાપ્તં તત્કાલલાલામૃતમપિબદહીન્દ્રાખ્યપુર્યાં યતીન્દોઃ ।
માતુર્ભ્રાતુસ્તનૂજોત્તમગુણકુરુકાધીશવંશ્યાર્ચિતાં ત-
ન્મૂર્તિં સમ્પ્રાપ્ય કાઞ્ચયાં સ્વયમપિ ચિરમારાધયદ્ભક્તિભૂમ્ના ॥ ૨૯॥

કાલે વેદાન્તસૂરિસ્સ્વપદમુપગતં બ્રહ્મતન્ત્રસ્વતન્ત્રં
શિષ્યાગ્ર્યં મૂર્તિમેનાં સમનયદથ તચ્છાત્રપારમ્પરીતઃ ।
સેયં વાગીશમૂર્તિર્ગુરુવરપરકાલાદિભિઃ સેવ્યમાના
રમ્યાસ્થાન્યાં ત્રિકાલં વિલસતિ વિહિતાર્ચાદ્ય કર્ણાટદેશે ॥ ૩૦॥

ધર્મં પૂર્વાશ્રમોક્તં સુકરમપિ ન કૃત્વાઽન્તિમોક્તસ્ય તસ્યા-
નુષ્ઠાનેઽશક્તિભીતં યમુખકૃપણં લમ્ભયિત્વાઽઽશ્રમં તમ્ ।
શોભોદ્રેકાદિનાઽર્ચાવિશય ઉપગતે લક્ષ(કોટિ)પૂજાં તુલસ્યા
સ્વોપાખ્યા વ્યાકૃતિં ચાકલયસિ કિયતી મય્યનર્ઘા દયા તે ॥ ૩૧॥

ઇત્થં વાગીશપાદૂયુગલસતતસંસેવનાર્ચાદિદીક્ષઃ
તત્રૈતાં નવ્યરઙ્ગેશ્વરયતિરનઘામાર્પયદ્રત્નમાલામ્ ।
એનાં નિત્યં પઠન્તો ભુવિ મનુજવરા ભક્તિભૂનેપ્સિતાર્થાન્
સર્વાન્ વિન્દન્તિ વાહાનનવરકરુણાપાઙ્ગધારાભિષેકાત્ ॥ ૩૨॥

ઇતિ શ્રીલક્ષ્મીહયગ્રીવદિવ્યપાદુકાસેવક-
શ્રીમદભિનવરઙ્ગનાથબ્રહ્મતન્ત્રપરકાલમહાદેશિકકૃતિષુ
શ્રીલક્ષ્મીહયવદનરત્નમાલાસ્તોત્રં સમાપ્તમ્ ।

Encoded and proofread by Rujuta rujuta5879 at gmail.com

*shrIlakShmIhayavadanaratnamAlAstotram*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*